**अतिचारिन्** त्रि॰ अति+चर–णिनि । पूर्व्वोक्तातिचारवति ग्रहे । "अतिचारी यदा जीव" इति ज्योतिषम् । अति-क्रम्य अतिशयेन वा गन्तृमात्रे त्रि॰ ।

**अतिच्छत्र** पु॰ अतिक्रान्तश्छत्रम् तुल्याकारेण अत्या॰स॰ । (छातिया) इति प्रसिद्धे स्थलतृणविशेषे, (तालमाखना) इति प्रसिद्धे जलतृणभेदे च । स्वार्थे कन् । अति-च्छत्रकोऽप्यत्रार्थे, छत्राकारपत्रपुष्पवति (सूलफा) इति प्रसिद्धे शाकभेदे तु स्त्री । क्षीरस्वामिमते छत्रा इत्येव नाम । छत्रातिक्रमकारिणि त्रि॰ । अतिक्रमेऽव्ययी॰। छत्रातिक्रमे अव्य॰ ।

**अतिच्छन्दस्** न॰ अतिक्रान्तः छन्दः इत्यानुसारिवर्णविन्यास-भेदम् अत्या॰स॰। उक्थादिच्छन्दोऽतिक्रमेण विन्यस्तेऽक्षर-विन्यासभेदे "प्राजापत्या अच्छन्दस" इति "अच्छन्दसः शंसतीति" च वेदः । छन्दो वेदोऽभिप्रायो वा । तदति-क्रान्तरि वेदोक्तकर्म्महीने, अतिक्रान्ताभिप्राये च त्रि॰ ।

**अतिजगती** स्त्री अतिक्रान्ता जगतीं द्वादशाक्षरपादामेका-क्षराधिक्यात् अत्या॰स॰। त्रयोदशाक्षरपादके छन्दोभेदे । जगतीं भुवनमतिक्रान्तवति त्रि॰। पुंसि क्लीवे च ह्रस्वान्तः ।

**अतिजव** त्रि॰ अतिशयितो जवोयस्य ब॰ । अतिवेगवति द्रुतगामिनि च । प्रा॰स॰ । अतिशयितवेगे पु॰ । "सगरसन्ततिसन्तरणेच्छया प्रचलितातिजवेन" इत्युद्भटः ।

**अतिजागर** पु॰ अतिशयितो जागरो निद्राराहित्यं यस्य ब॰। नीलवके पक्षिणि तस्य सर्व्वदा जागरूकत्वात्तत्त्वम् । निद्राराहित्यवति त्रि॰। [अतिदीर्घगमने ।

**अतिडीन** न॰अतिक्रान्तं डीनं गतिभेदं अत्या॰स॰। पक्षिणाम्

**अतित(मा)राम्** अव्य॰ अति+तर(म)प् आमु । अत्यन्ते "वेगवानतितरामायाति चेन्मारुत" इत्युद्भटः ।

**अतितार** त्रि॰अतिशयितस्तारः। मुक्तादेरतिशयशुद्धौ "अति-तारहारेति" कादम्ब॰ । अत्युच्चशब्दे पु॰ तद्वति त्रि॰ ।

**अतितीक्ष्ण** त्रि॰ अतिशयेन तीक्ष्णः कटुरसो यस्य ब॰ । मरीचादौ (सजना) इति प्रसिद्धे शोभाञ्जने पु॰ । अति-तिग्मे पु॰ ।तद्वति त्रि॰ ।

**अतिथि** पु॰ अतति गच्छति न तिष्ठति अत–इथिन् । अध्व-योगेन आगन्तुके गृहागते, "एकरात्रं हि निवसन् ह्यति-थिर्ब्राह्मणः स्मृतः । अनित्यास्य स्थितिर्यस्मात्तस्मादतिथि-रुच्यते" । नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथेति विष्णु स॰ । तस्य च वैश्वदेवबलेः प्रागेव पूज्यता परत्र आहारदानमात्रं यथोक्तं मनुना "वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् तस्मा अन्नं यथाशक्ति प्रदद्यादिति" किन्तु तस्यार्यातिथित्वमेव यथोक्तं "प्रियो वा यदि द्वेष्यो मूर्खः पण्डित एव वा । संप्राप्तो वैश्वदेवान्ते विप्रः सो-ऽतिथिरिष्यते" इति स्मृत्या ।अतिथिप्रतीक्षणञ्च मुहूर्त्ता-ष्टमभागपर्य्यन्तम् । "आचम्य च ततः कुर्यात् प्राज्ञो द्वारावलोकनम् मुहूर्त्तस्याष्टमं भागमुद्वीक्ष्योह्यतिथिर्भवेत्" इति मार्क॰ । विषये च तस्य इन्द्रियेषु संसर्गमात्रकाले एव चेतसि स्थितिर्नोत्तरकालमिति गतिरनुमीयते । "प्रथमं पथि लोचनातिथिर्मिति" नैष॰ ।

**अतिथिपूजा** स्त्री ६त॰ । गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गते न्वयज्ञरूपेऽतिथिपूजने अतिथिसत्कारादयोऽप्यत्र ।

**अतिदान** न॰ अतिशयितं दानम् प्रा॰ स॰ । अत्युत्कट-दाने "अतिदाने बलिर्बद्ध" इति नीति॰ ।

**अतिदिष्ट** त्रि॰ अति+दिश–क्त । अतिदेशविषये यथा "प्रकृतिवत् विकृतिः कर्त्तव्येति" वाक्येन प्रकृतीभूतदर्श-यागादेरङ्गकार्य्याणि प्रयाजादीनि विकृतौ पश्वादिया-गेऽतिदिश्यन्ते । अतिदेशोनाम इतरधर्म्मस्य इतरस्मिन् प्रयोगाय आदेशः इति मीमांसायां स्थितम् ।

**अतिदीप्य** पु॰ अतिशयेन दीप्यते अति+दीप-कर्त्तरि यत् । रक्तचित्रके (लालचिता) इति ख्याते वृक्षे ।

**अतिदेव** पु॰ अतिक्रान्तोदेवान् अत्या॰स॰। सर्व्वदेवश्रेष्ठे रुद्रे "द्रावयाच्चातिदेव इति" वेदः ।

**अतिदेशः** पु॰ अतिक्रम्य स्वविषयमुल्लङ्घ्य अन्यत्र विषये देश उपदेशः अतिदिश्यते वा करणे कर्म्मणि वा घञ् । "अन्यत्रैव प्रणीतायाः कृत्स्नाया धर्म्मसंहतेः । अन्यत्र कार्य्यतः–प्राप्तिरतिदेशः स उच्यते । प्राकृतात् कर्म्मणो यस्मात्तत्–समानेषु कर्म्मसु। धर्म्मप्रवेशो येन स्यादतिदेशः स उच्यते" इत्यधिकरणमालाधृताभियुक्तवाक्योक्ते अन्यत्र-प्राप्तेऽन्यधर्म्मे तत्प्रापके शास्त्रभेदे च । यथा "प्रकृतिवत् विकृतिः कर्त्तव्येत्यादिः" स चातिदेशः पञ्चविधः शास्त्राति-देशः, कार्य्यातिदेशः, निमित्तातिदेशः, व्यपदेशातिदेशः, रूपातिदेशश्च । एतस्य उदाहरणादिकमाकरे ज्ञेयम् । अतिदेशश्च प्रायेण इववदादिसादृश्यवाचकशब्देन यथा प्रकृतिवत् विकृतिरित्यादि अयञ्च वैदिककर्म्मणीव व्याक-रणादिशास्त्रे, लौकिके व्यवहारे च विद्यते यथा "इस्व-दिक, इत्यत्र व्याकरणे रूपातिदेशः" "कर्म्मणा कर्मवत्तुल्य-क्रिय" इत्यादौ, पुंवदित्यादौ च कार्य्यातिदेशः, णिद्वदि-त्यादौ निमित्तातिदेशः, व्यपदेशिवद्भावइत्यादौ संज्ञाति-